क्र. १६

संस्कृत **राजवाडे** धार्मिक

अंक ४४० शाखा

ग्रंथनाम हिरण्यकेशी कीरकोळ

ग्रंथकार

काल पृष्ठ

Joint project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai.

(1)

श्रीगणेशाय नमः ॥ गणाधिपं नमस्कृत्य प्रत्यूहाद्रिपविं कविं ॥ त्र्यंबकेण सुबोधाय क्रि-
यते ऽशौचनिर्णयः ॥ १ ॥ अर्थतः शब्दतश्चैव ह्यपो न रूत्तस्य न दुष्यति ॥ स्फुटबोधाय बा-
लानां ग्रंथोयं रच्यते यतः ॥ २ ॥ अत्र प्रागुपनयनात्कामचारवादभक्षा इति गौतमो-
क्तेरनुपनीतस्य पित्रादिसंस्कारं विना शौचेनाधिकारः ॥ स्त्रीशूद्रयोस्तु विवाहस्य
उपनयनोत्तरमपि ब्रह्मचारिणः पित्राद्यंतकर्मकरण एवाशौचाधिकारो नान्यत्र ।
तस्माद्द्विजानां समावर्तनोत्तरं निरंकुशाशौचाधिकारः ॥ स्त्रीशूद्रयोस्तु विवाहस्य
उपनयनस्थानापन्नत्वेन विवाहोत्तरमेवाशौचाधिकारः ॥ इति त्र्यंबकीये आशौ-
चनिर्णये प्रथमोंशः ॥ ३ ॥ अथ जननाशौचं ॥ तत्र गर्भिण्या मासचतुष्टयपर्यंतं
गर्भनाशः स्रावइत्युच्यते । तदा गर्भिण्या मासत्रयपर्यंतं त्रिरात्रं ॥ चतुर्थे मासि च

Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

(2)

त्र्यंबकी

१

तूरात्रमाशौचमस्पृश्यत्वंचपित्रादिसपिंडानांस्त्रावमात्रेस्नानाच्छुद्धिः॥ इतित्र्यं॰द्वितीयोंशः॥२॥
गर्भिण्याःपंचमषष्ठमासयोर्गर्भनाशःपातइत्युच्यते॥ तत्रगर्भिण्यामाससमसंख्ययापंचषट्
चदिनानिक्रमेणास्पृश्यत्वावहमाशौचं॥ पित्रादिसपिंडानांतुत्रिरात्रंजननाशौचं॥ मृताशौचंतुना
स्ति॥ इदमेतावत्पर्यंतंसर्ववर्णसाधारणंवयोवस्थानिमित्तत्वात्॥ इतित्र्यं॰तृतीयोंशः॥३॥ गर्भि
ण्याःसप्तममासप्रभृतिप्रसवेसर्वेषांमातापित्रादीनांसपिंडानांविप्राणांदशाहं॥ क्षत्रियाणांद्वा
दशाहं॥ वैश्यानांपंचदशाहं॥ शूद्राणांमासः॥ सच्छूद्रस्यमासार्धंजननाशौचं मृताशौचंतुना
स्ति सापत्नमातुःसर्वत्रपितृवत्॥ इतित्र्यं॰चतुर्थोंशः ४ जननाशौचेगर्भिण्याःदशाहमस्पृश्य
त्वं पितुःसापत्नमातुश्चस्नानात्प्रागस्पृश्यत्वं स्नानोत्तरंस्पृश्यत्वमेव किंतुसर्वत्रसपिंडानांक
र्मानधिकारमात्रंतत्रापिनालच्छेदात्पूर्वंजातकर्मदानादौपितुरधिकारःएवंप्रथमषष्ठदशमदिव
सेषुजन्मदादेवतापूजायांचापितुर्वचनादधिकारः कूटस्थमारभ्यसप्तपुरुषपर्यंतंसपिंडाः ततः

राम

१

(2A)

सप्तसोदकाः ततःसप्तसगोत्राः सोदकानांत्रिरात्रमाशौचं सगोत्राणांस्नानमात्रं इतित्र्यं०पंच
मोंशः ५ गर्भिण्याःदशाहोत्तरंपुत्रोत्पत्तौविंशतिदिनानिकन्योत्पत्तौमासपर्यंतंकर्मानधिकारः इ
तित्र्यं०षष्ठोंशः ६ अथमृताशौचं तत्रतद्दतामस्पृश्यत्वंकर्मानधिकारश्चेत्युभयंभवति मृ
तजातेशिशौसर्वेषांसपिंडानांदशाहंजननाशौचंमृताशौचंतुनास्ति इतित्र्यं०सप्तमोंशः ७ ना
लच्छेदात्पूर्वंशिशौमृतेमातुर्दशाहं पित्रादिसपिंडानांत्रिरात्रंजननाशौचं।मृताशौचंतुनास्ति इ
तित्र्यं०अष्टमोंशः ८ नालच्छेदादूर्ध्वंशिशुमरणेदशाहंजन्माशौचंसर्वेषांसपिंडानामस्ति मृताशौ
चंतुनास्ति इतित्र्यं०नवमोंशः ९ दशाहानंतरंनामकरणात्प्राकृशिशुमरणेस्नानमात्रेणसपिं
डानांशुद्धिः मातापित्रोस्त्रिरात्रंपुत्रमृतौकन्यामृतौत्वेकाहः नाम्नः पूर्वंखननमेवनित्यंनोदकदा
नादि अलंकरणंतुसर्वत्रभवति इतित्र्यं०दशमोंशः १० नामकरणोत्तरंवर्षत्रयपर्यंतंदाहखननयो
र्विकल्पः इतित्र्यं०एकादशोंशः ११ नामोत्तरंदंतोत्पत्तेः प्राकूपुत्रमरणेदाहेसपिंडानामेकाहः खन

(3)

त्र्यंबकी

२

नेतुस्नानाच्छुद्धिः मातापित्रोरुभयत्रापित्रिरात्रंकन्यामृतौतुत्रिपुरुषसापिंडानांउभयत्रापिस्नाना
च्छुद्धिः मातापित्रोरुभयत्राप्येकाहः इतित्र्यं० द्वादशोंशः १२ दंतोत्पत्तेरूर्ध्वंवर्षत्रयपर्यंतंपुत्रमर
णेदाहरवननेवासापिंडानामेकाहः मातापित्रोस्त्रिरात्रंकन्यामृतौतुत्रिपुरुषसापिंडानांस्नानाच्छु
द्धिः मातापित्रोस्त्रिदिनमाशौचं इतित्र्यं० त्रयोदशोंशः १३ अथ मवर्षादौकृतचूडस्यपुत्रस्यम
रणेपित्रादिसर्वसपिंडानांत्रिदिनमाशौचंनियतं दाहश्चानियतः इतित्र्यं० चतुर्दशोंशः १४ त्रि
वर्षोर्ध्वंकृतचूडस्याकृतचूडस्यवापुत्रस्यमरणेप्रागुपनयनात्पित्रादिसर्वसापिंडानांत्रिदिनमा
शौचंदाहएव उदकदानादितूष्णीकृतचूडस्य भमोपिंडदानंतूष्णीं इतित्र्यं० पंचदशोंशः १५ क
न्यायाववर्षत्रयानंतरंवाग्दानात्प्रागमरणेत्रिपुरुषसापिंडानामेकाहः मातापित्रोस्त्रिदिनं दाहोद
कदानादितूष्णीमेव इतित्र्यं० षोडशोंशः १६ वाग्दानोत्तरंविवाहात्प्राङ्मृतासुकन्यासुभर्तृकुलेपि
तृकुलेचसप्तपुरुषसापिंडानांपित्रादीनांसर्वेषांत्रिदिनमाशौचं ॥ दाहोदकदानादितूष्णीं इतित्र्यं

राम

२

(3A)

२ वैश्यानांपंचदशाहं

बकी० सप्तदशोंशः १७ उपनयनोत्तरं मृतस्य पुरुषस्य सर्वेषां सपिंडानां विप्राणां दशाहं क्षत्रियाणांद्वा
दशाहं "शूद्राणांमासं सच्छूद्राणांमासार्धं सोदकानांत्रिरात्रं गोत्रजानांस्नानाच्छुद्धिः इतित्र्यंब०
अष्टादशोंशः १८ विवाहोर्ध्वं कन्यायाः पितृगृहे मरणे मातापित्रोः सोदरभ्रातुश्च त्रिरात्रं पितृव्या
दीनामेकाहः इतित्र्यं० एकोनविंशोंशः १९ ऊढायाः कन्यायाः पितृगृहे प्रवसे मातापित्रोस्त्रिरात्रं
सोदरस्यैकरात्रं पितृव्यादीनामेकाहः इतिकेचित् इतित्र्यं० विंशोंशः २० ऊढायाः कन्यायाः
पतिगृहे प्रसवे पित्रादीनामाशौचंनास्ति इतित्र्यं० एकविंशोंशः २१ ऊढायाः कन्यायाः पितृ
गृहे मरणे मातापित्रोस्त्रिरात्रं इतित्र्यं० द्वाविंशोंशः॥२२ मातापित्रोर्मरणे ऊढपुत्रीभ्यास्त्रिरा
त्रं दशाहांतः दशाहोर्ध्वं कालांतरे वत्सरांतरेपि पक्षिणी अत्रैवातिक्रांताशौचं ब्राह्मणव
चनाद्भवति नान्यत्र इतित्र्यं० त्रयोविंशोंशः २३ भ्रातृभगिन्योः परस्परगृहे मरणे परस्प
रस्य त्रिरात्रं गृहांतरमृतौ तु परस्परस्य पक्षिणी इतित्र्यं० चतुर्विंशोंशः मातुलमरणे
भगिन्यपत्यस्य पक्षिणी उपकारिमातुलमरणे तु त्रिरात्रं इतित्र्यं० पंचविंशोंशः २५ मातुलान्या

मरणेभर्तृभगिन्यपत्यस्यपक्षिणी इतित्र्यं० षड्विंशोंशः २६ उपनीतभागिनेयमरणेमातुलस्यमा
तुलभगिन्याश्चत्रिरात्रं अनुपनीतेमृतेतुमातुलभगिन्याश्चपक्षिणी इतित्र्यं० सप्तविंशोंशः
२७ मातामहमरणेदुहित्रपत्यस्यत्रिरात्रं इतित्र्यं० अष्टाविंशोंशः २८ दौहित्रमरणेमातामह
(५) स्यमातामह्याश्चत्रिरात्रं अनुपनीतेमृतेतुमातामहस्यमातामह्याश्चपक्षिणी इतित्र्यं० एको
नत्रिंशोंशः २९ मातामह्यांमृतायांदुहित्रपत्यस्यपक्षिणी इतित्र्यं० त्रिंशोंशः ३० श्वश्रूश्वशुर
योर्मृतौसत्यांजामातुःसन्निधौत्रिरात्रं असन्निधौपक्षिणीग्रामांतरेचैकरात्रं इतित्र्यं एक
त्रिंशोंशः ३१ जामातरिमृतेतुश्वश्रूश्वशुरयोःस्नानाच्छुद्धिः एकाहमाशौचमितिकेचित्
इतित्र्यं० द्वात्रिंशोंशः ३२ शालकेमृतेभार्यानीमृतुरेकोहः शालकसुतमरणेस्नानमात्रं॥
इतित्र्यं० त्रयस्त्रिंशोंशः ३३ पितृष्वसरिमृतायांभ्रात्रपत्यस्यपक्षिणी इतित्र्यं० चतुस्त्रिं
शोंशः ३४ मातृष्वसरिमृतायांस्वस्रपत्यस्यपक्षिणी इतित्र्यं० पंचत्रिंशोंशः ३५ आत्मनःपि श्रीः
तृष्वसृमातृष्वसृमातुलपुत्राआत्मबांधवाः पितुःपितृष्वसृमातृष्वसृमातुलपुत्राःपितृबां २

(5A)

धवाः मातुः मातृष्वसृपितृष्वसृमातुलपुत्रा मातृबांधवाः एते त्रिविधा बांधवा बंधुत्रयं एतेषु मृतेषु
पक्षिणी॥ पितृष्वस्रादिकन्यानामूढानां तु मरणे एकाहः इति त्र्यं० षड्त्रिंशोंशः ३६ दत्तकमृतौ तु पूर्वाप
रपित्रोस्त्रिरात्रं सपिंडानामेकाहः इति त्र्यं० सप्तत्रिंशोंशः ३७ पूर्वापरपित्रोर्मृतौ दत्तकस्य त्रिरात्रं इति
त्र्यं० अष्टत्रिंशोंशः ३८ दत्तकस्य पुत्रपौत्राणां मरणे जनने वा सपिंडानामेकाहः इति त्र्यं० एकोन
चत्वारिंशोंशः ३९ सपिंडीपुत्रीकृते दत्तके तु मृते सपिंडानां दशाह एव इति त्र्यं० चत्वारिंशोंशः ४०
आचार्यमरणे शिष्यस्य त्रिरात्रं तत्पुत्रपत्न्योर्मरणे एकाहः उपनीयाध्यापक आचार्य इत्युच्य
ते वेदैकदेशाध्यापक उपाध्यायः तन्मरणे शिष्यस्यैकरात्रं इति त्र्यं० एकचत्वारिंशोंशः ४१ शिष्य
स्योपनीतस्य मरणे गुरोस्त्रिरात्रं परोपनीतस्य मरणे तु एकरात्रं इति त्र्यं० द्विचत्वारिंशोंशः ४२
सहाध्यायिनो मृतौ एकग्रामीणयोरनूचानश्रोत्रिययोः मृतौ चैकाहः सांगवेदाध्यायी अनूचानः
वेदमात्राध्यायी श्रोत्रियः अध्ययनशब्दार्थस्यार्थज्ञानपर्यवसायित्वं न्यायसिद्धं इति त्र्यं० त्रि
चत्वारिंशोंशः असपिंडस्याप्यश्रोत्रियस्य मैत्र्यादिसंबद्धस्य यद्गृहे मरणं तद्गृहस्वामिन एक

Joint project of the Rajavade Samshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

(5)

रात्रं॥इतित्र्यंबकीयेचतुश्चत्वारिंशोंशः४४ वानप्रस्थेयतौषंढेचमृतेयुद्धमृतेचसपिंडानांस्नानमा
त्रं इतित्र्यं॰ पंचचत्वारिंशोंशः॥४५॥अथातिक्रांताशौचं॥ तत्रजननेतिक्रांताशौचंनास्ति पितुःस्नानं
तत्रापिभवति मृतकेपिअनुपनीतमरणादिनिमित्तकत्रिरात्रादिषु भागिनीमातुलादिमरणनिमित्त
त्रिरात्रादिषुच अतिक्रांताशौचंनास्ति किंतुदशाहादिमृताशौचविषयमेव इतित्र्यं॰षट्चत्वारिंशों
शः ४६ दशाहमध्येजननेमरणेवाज्ञातेपुत्रादीनांसर्वेषांशेषेणैवशुद्धिः संस्कारमपिशेषेणैव
समापयेत् अस्थिपर्णशरसंस्कारमपिशेषेणैवसमापयेत् इतित्र्यं॰सप्तचत्वारिंशोंशः ४७ आ
द्यत्रिरात्रमध्येसमानोदकमरणेज्ञातेसमानोदकानांशेषेणैवशुद्धिः त्रिरात्रेतिक्रांतेतुदशाह
मध्येज्ञातेपिनाशौचं किंतुस्नानमात्रं अयमेवन्यायः मातुलादिषुत्रिरात्रादिषुज्ञेयः इतित्र्यं॰
अष्टाचत्वारिंशोंशः ४८ मातापित्रोर्मरणेदूरदेशेपिवत्सरानंतरमपिश्रवणेपुत्रोदशाहादि
पूर्णमेवाशौचंकुर्यात् इतित्र्यं॰ एकोनपंचाशदंशः ४९ स्त्रीपुंसयोः परस्परमरणेपरस्पर स्त्रीः
स्यदेशांतरेवत्सरांतरेपिपूर्णंदशाहादिभवति इतित्र्यं॰ पंचाशद्दंशः ५० सपत्नीषुपरस्परम ४.

(5A)

तौपरस्परस्यदेशकालानपेक्षंदशाहंपूर्णमाशौचं ५१ सपत्नमातुर्मरणेसंवत्सरोर्ध्वमपिदेशांत
रेपित्रिरात्रं ५२ औरसपुत्रेमनेसंवत्सरोर्ध्वमपिदेशांतरेपिमातापित्रोस्त्रिरात्रं ५२ दशाहोर्ध्वं
एकदेशेज्ञातिमरणेज्ञातेमासत्रयपर्यंतंत्रिरात्रं षण्मासपर्यंतंपक्षिणी नवमासपर्यंतमेकोदिनं तद
नंतरंस्नानमितिवृद्धवसिष्ठः ५४ पक्षत्रयपर्यंतंत्रिरात्रमशौचं षण्मासपर्यंतंपक्षिणी वर्ष[illegible]प
र्यंतमेकरात्रं तदूर्ध्वंस्नानमात्रंइति माधवे देवलः ५५ अत्रापवादनापद्विषयत्वेनव्यवस्थादशाहो
र्ध्वं ५६ देशांतरेज्ञातिमरणेज्ञातेत्रिपक्षपर्यंतंत्रिरात्रं ततोमासषट्कपर्यंतमहोरात्रं ततोवर्षपर्यंतं
दिवाश्रवणेआसायंरात्रिश्रवणेआप्रातराशौचं॥संवत्सरांतेस्नानाच्छुद्धिः॥इदमतिक्रांताशौचं
सर्ववर्णसाधारणं अत्रदेशांतरेज्ञातिमरणेज्ञातेस्नानाच्छुद्धिरितिकेचित् तन्माधवोदाहृतवि
ष्णुस्मृत्यज्ञानविलसितमितिज्ञेयं॥देशांतरंतुविप्रस्यविंशतियोजनानंतरं क्षत्रियस्यचतुर्विंश
तियोजनानंतरं वैश्यस्यसच्छूद्रस्यत्रिंशद्योजनांतरं असच्छूद्रस्यषष्टियोजनांतरंज्ञेयं पक्षांतरा
णितुउक्तपक्षानुसारेणनेतव्यानि अत्रनिष्कर्षः यानिएकगोत्रविषयाणिंपुनर्भगिनीमातुला

Joint property of the Rajwade Sanshodhan Mandal Dhule and the Yashwantrao Chavan Pratishthan Mumbai (partly legible)

वस्पर्शेतुदिवाचेन्नक्षत्रदर्शनाच्छुद्धिः ८३ रात्रौचेत्सूर्यदर्शनात् ८४ तदन्नाशनेतद्गृहवासेयावत्तेषामा
शौचंतावदाशौचं ८५ संसर्गाशौचेकर्मानधिकारोनास्तिकिंत्वस्पृश्यत्वमात्रं ८६ तद्गृहस्थाणांद्रव्या
(7) णांनाशौचसंबंधः ८७ स्नेहेनसवर्णनिर्हारेतदन्नाशनेनतद्गृहवासेचदशाहः ८८ तदन्नाशनेतद्गृ
हवासेत्र्यहः ८९ अगृहवासेअन्नाभक्षणेनिर्हरणमात्रेकृतेचेकाहः ९० भृतिग्रहणेसवर्णनिर्हारेदा
हेचतज्जात्याशौचंदशाहादि ९१ विजातीयनिर्हारेविजातीयदाहेचशवजातीयमाशौचं ९२ भृति
ग्रहेविजातीयनिर्हारेदाहेचशवजातीयाद्द्विगुणं ९३ मादकनिर्हारेदशाहः ९४ असपिंडालंकरणेअ
ज्ञानादुपवासः ९५ अशक्तौस्नानं ९६ ज्ञानतःपादकृच्छ्रः ९७ धर्मार्थमनाथशवनिर्हरणेक्रिया
करणेअग्निदानेचद्विजस्यानंतंफलं ९८ स्नानाच्छुद्धिःप्राणायामोग्निस्पर्शश्च ९९ धर्मार्थमना
थसवर्णनिर्हरणादावपिमातुलत्वादिसंबंधेसति त्रिरात्रमाशौचं १०० अनुगमनेतुसपिंडेनदो
षः १०१ असपिंडेपिअनाथक्रियायांनदोषः १०२ समोत्कृष्टवर्णशवानुगमनेस्नात्वाकृता श्री
शौचस्पृष्ट्वासर्पिःप्राश्यपुनःस्नात्वाप्राणायामंकुर्यात् १०३ हीनवर्णशवानुगमनेक्षत्रियेएका ६

ह: १०४ वैश्येपक्षिणी १०५ भूद्रेत्रिरात्रं १०६ पूर्ववत्स्नानादि १०७ ब्रह्मचारिणः सपिंडमरणेनाशौचं १०८
नान्यस्यनिर्हाराद्योर्ध्वदेहिके धिकारः १०९ तत्करणेपुनरुपनयनं कृच्छ्रप्रायश्चित्तंच ११० ब्रह्मचारिणः
पितृमात्राचार्योपाध्यायमातामहानां अंत्यकर्मकरणेनदोषः १११ तत्रदशाहमस्पृश्यत्वलक्षणमाशौ
(7A) चं ११२ दशादिनंसंध्याग्निकार्यादिकर्माधिकारोस्त्येव ११३ एकदिनमस्पृश्यत्वमितिमाधवः ११४ पित्राद्या
शौचेपिनाशौचिनामन्नंभक्षयेत् भक्षणेपुनरुपनयनं ११५ ब्रह्मचारिणःपित्राद्यंतकर्माकरणेतुपित्रादि
मरणेपिनाशौचं ११६ समावर्तनोत्तरंपूर्वमृतानांत्रिदिनाशौचविकल्पः ११७ कृतजीवच्छ्राद्धेन किमप्या
शौचं नकार्यमितिहेमाद्रिः ११८ वनस्थयतिपातितैरपिकिमप्याशौचंनकार्यं ११९ तेषामपितैरन्नंका
र्यं १२० परेषांवर्णानांमोर्ध्वदेहिककरणेतज्जात्याशौचंकृत्वा कृच्छ्रत्रयाच्छुद्धिः १२१ हीनवर्णोर्ध्वदे
हिककरेतुद्वैगुण्यत्रैगुण्याद्यूह्यं १२२ आहिताग्नेरस्थिदाहेप्रकृतिदाहेवासर्वसपिंडानांदशाहाशौ
चं १२३ अनाहिताग्नेरस्थिदाहेपर्णशरदाहेचपत्नीपुत्रयोः पूर्वमगृहीताशौचयोः दशाहादिपूर्ण
मेव २४ गृहीताशौचयोस्तुतयोरपिसंस्कारकाले त्रिरात्रं १२५ पत्न्यासंस्कारेचैवंपत्न्यश्चैवं १२६

Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai.

(8)

त्र्यं· ७ पत्न्योश्चैवं १२७ अन्यसपिंडानांतुपूर्वमगृहीताशौचानांसर्वत्रपर्णशरदाहेत्रिरात्रं १२८ गृहीताशौचा
नांतुसपिंडानांस्नानमात्रं १२९ एतच्चत्रिरात्रंदशाहोर्ध्वंसंस्कारकरणेज्ञेयं दशाहमध्येतुशेषदिव
सैर्देवशौचसिद्धेरुक्तत्वात् १३० इतियायजूकशिवराम णिहनुमदुपनामकरघुनाथनारायणात्म
जत्र्यंबकपंडितकृताशौचनिर्णयः समाप्तः ॥ ॥

श्री: ७

" Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai. "

श्रीगणेशायनमः॥ ॥अथबालबोधार्थंप्रयोगविधिःकथ्यते॥प्रयोगश्चतुर्विधः॥सकर्मकप्रयोगः॥अकर्मक
प्रयोगः॥कर्मणिप्रयोगः॥भाविप्रयोगः॥तत्रसकर्मकप्रयोगोयथा॥कृष्णःभास्कारक्षति॥अकर्मकप्रयोगो
यथा॥कृष्णःआसीत्॥कर्मणिप्रयोगोयथा॥कृष्णेनप्रपंचः क्रियते॥भाविप्रयोगोयथा॥कृष्णेनस्थी
यते॥इतिप्रयोगविधिः॥अथसमासविधिः॥षोढासमासास्संक्षेपादष्टाविंशतिधापुनः॥नित्यानित्यत्व
योगेनलुगलुक्केनचद्विधा॥तत्राष्टधातत्पुरुषःसप्तधाकर्मधारयः॥सप्तधाचबहुव्रीहिर्द्विगुराभाषितो
द्विधा॥द्वंद्वश्चतुविधोज्ञेयअव्ययीभावोद्विधामतः॥तेषांपुनःसमासानांप्राधान्यंतुचतुर्विधं॥पूर्वपदार्थप्रधा
व्ययीभावः॥उत्तरपदार्थप्रधानस्तत्पुरुषः॥अन्यपदार्थप्रधानोबहुव्रीहिः॥उभयपदार्थप्रधानोद्वंद्वः॥तत्रा
ष्टधातत्पुरुषइतिकथं॥प्रथमातत्पुरुषः॥द्वितीयातत्पुषः॥तृतीयातत्पुरुषः॥चतुर्थीतत्पुरुषः॥पंचमीतत्पुरु
षः॥षष्ठीतत्पुरुषः॥सप्तमीतत्पुरुषः॥नञ्तत्पुरुषश्चेति॥तत्रप्रथमातत्पुरुषःयथा॥पूर्वंकायस्यपूर्वका

"Joint Project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai."

यः॥अपरंकायस्यअपरकायः॥अधरंकायस्यअधरकायः॥अर्धंपिप्पल्याः॥अर्धपिप्पलीः॥अर्धंकोशातक्याःअर्धकोशातकी॥
तस्मात्प्रथमाथतत्पुरुषइत्युच्यते॥एवंमुत्तरत्रापिज्ञेयं॥द्वितीयातत्पुरुषोयथा॥कृष्णंश्रितःकृष्णश्रितः॥
दुःखातीतः॥तृतीयातत्पुरुषोयथा॥शंकुलयाखंडःशंकुलाखंडः॥धान्येनार्थोधान्यार्थः॥चतुर्थीतत्पुरु
षोयथा॥यूपायदारुयूपदारु॥कुंडलायहिरण्यंकुंडलहिरण्यं॥पंचमीतत्पुरुषोयथा॥सिंहाद्भयंसिंह
भयं॥दस्युभ्योभयंदस्युभयं॥षष्ठीतत्पुरुषोयथा॥राज्ञःपुरुषोराजपुरुषः॥सप्तमीतत्पुरुषोयथा॥अक्षेषु
शौंडःअक्षशौंडः॥तत्रमत्तइत्यर्थः॥नञ्तत्पुरुषोयथा॥नब्राह्मणःअब्राह्मणः॥नअश्वःअनश्वः॥इतितत्पुरु
षः॥अथकर्मधारयः१२॥विशेषणपूर्वपदोविशेष्यपूर्वपदोविशेषणोभयपूर्वपदोउपमानपूर्वपदउपमानोत्तरपदःसंभाव
नापूर्वपदअवधारणापूर्वपदश्चेति॥तत्रविशेषणपूर्वपदोयथा॥कृष्णश्चासौसर्पश्चकृष्णसर्पः॥नवाचासौल
ताचनवलता॥नीलंचतत्उत्पलंचनीलोत्पलं॥विशेष्यपूर्वपदोयथा॥वैयाकरणश्चासौखसूचिश्चवैयाकरण

Joint project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

(10A)

रवस्वन्चिः॥विशेषणोभयपदोयथा॥सीतंचतदुष्णंचसीतोष्णं॥उपमानपूर्वपदोयथा॥घनइवशामःघनः
शामः॥उपमानोत्तरपदोयथा॥पुरुषोयंव्याघ्रइवपुरुषव्याघ्रः॥संभावनापुर्वपदोयथा॥गुणइतिबुधिःगुण
बुधिः॥पुत्रइतिग्रहणपुत्रग्रहणं॥अवधारणापूर्वपदोयथा॥विनयएवधनंविनयधनं॥सुक्तमेवबंधुःसुक्तबं
धुः॥इतिकर्मधारयः॥अथबहुव्रीहिः॥ ॥द्विपदोबहुपदःसंख्योतरपदसंख्योभयपदःसहपूर्वपदोव्य
तिहारलक्षणोदिगंतराललक्षणश्चेति॥तत्रद्विपदोयथा॥आरूढोवानरोयंवृक्षंआरूढवानरोवृक्षं॥निर्जितःकामो
येनसःनिर्जितकामः॥उपनीतंभोजनंयस्मैसःउपनीतभोजनोब्राह्मणः॥निष्क्रांतःजनोयस्मात्निष्क्रांतनगरं॥रुद्र
कःपदोयस्यसःरुद्रकपदः॥उषितःविप्रोयस्मिन्सःउषितविप्रोग्रामः॥बहुपदोयथा॥पराक्रमेणोपार्जिताः
संपदोयेनसःपराक्रमेणोपार्जितसंपत्॥संख्योतरपदोयथा॥समीपेदशानामीमेउपदशाः॥समीपेविंशतिः
रमेउपविंशाः॥संख्योभयपदोयथा॥द्वौवात्रयोवाद्वित्राः॥त्रयोवाचत्वारोवात्रिचतुराः॥सहपूर्वपदोय

(11) था॥म्लेनसहोध्रुतोवक्षःसहमूलःसहमूलोवा॥व्यतिहारलक्षणोयथा॥केशेषुकेशेषुगृहीत्वाइतिदंप्रवृ
त्तमितिकेशाकेशि॥दंडादंडि॥दिगंतराललक्षणोयथा॥दक्षिणस्याःपूर्वस्याश्चदिशोर्यदंतरालसादक्षिणपूर्व॥
एवमुत्तरपूर्वा॥इतिबहुव्रीहि॥ ॥अथद्विगुः॥एकवद्भावोनेकवद्भावश्चेति॥तत्रैकवद्भावोयथा॥त्रीणि
शृंगाणिसमाहृतानित्रिशृंगं॥पंचानांपूगानांसमाहारःपंचपूगी॥अनेकवद्भावोयथा॥त्रयोलोकाःत्रिलो
काः॥इतिद्विगुः॥ ॥अथद्वंद्वः॥समुच्चयान्वाचयःसमाहारेतरेतरयोगश्च॥तत्रसमुच्चयान्वाचययोरसा
मर्थ्यात्समासोनास्ति॥समुच्चयोयथा॥देवदत्तःपचति॥यज्ञदत्तःपचति॥अन्वाचयेयथा॥भिक्षामटगांच
आनय॥समाहारोयथा॥शंखश्चपटहश्चशंखपटहं॥भेर्यश्चमृदंगाश्चभेरीमृदंगं॥इतरेतरयोगोयथा॥
रामश्चलक्ष्मणश्चरामलक्ष्मणौ॥इतिद्वंद्वः॥ अथाव्ययीभावः॥नामपूर्वपदोव्ययपूर्वपदश्चेति॥तत्रनामपू
र्वपदोयथा॥शाकस्यमात्रंशाकप्रति॥सूपस्यलेशोगंधोवासूपप्रति॥अव्ययपूर्वपदोयथा॥कुंभस्यसमीपे

"Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai."

(12)

उपकुभं॥गिरिंगिरिंप्रतिप्रतिगिरिं॥तटंतटंप्रतिअनुतटं॥समुनर्द्विविधः॥नित्यसमासोनित्यसमासश्चेति॥
नित्यसमासोयथा॥कुंभंकरोतीतिकुंभकारः॥अनित्यसमासोयथा॥वृक्षंश्रितःवृक्षश्रितः॥लुकूसमा
सोलुकूसामासश्चेति॥लुकूसमासोयथा॥सरसिजायतइतिसरोजं॥अलुकूसमासोयथा॥सरसिजा
यतइतिसरसिजं॥वनेचरतीतिवनेचरः॥ इतिसमाससंग्रहः॥ विशेषणलिंगस्यविशेषण
लिंगत्वं॥वक्तव्यं॥क्रियाव्ययविशेषणानांकर्मत्वंनपुंसकत्वमेकवचनांतत्वंचवक्तव्यं॥यल्लिंगंयद्वचनंयाच
विभक्तिर्यद्विशेष्यस्यतल्लिंगंतद्वचनंसाचविभक्तिः॥विशेषणस्य॥सदृशंत्रिषुलिंगेषुसर्वासुचविभक्ति
षु॥वचनेषुचसर्वेषुयन्नव्येतितदव्ययं॥५॥

Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai. " Joint project of the " 

(13) अथषष्ठीपूजनप्रयोगप्रारंभोयं॥

" Joint project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai. "

ष०पु० श्रीगणेशायनमः॥ अथषष्ठीपूजनं॥ पंचमेषष्ठेचदिवसेप्रदोषसमयेस्नात्वागंधमाल्यभूषि
१ तआचम्यप्राणानायम्यदेशकालौसंकीर्त्य मम अस्याः सूतिकायाः भार्यायाः शिशोश्च
सकलानिष्टनिरसनपूर्वकायुरारोग्यैश्वर्याभिवृद्धिद्वाराश्रीपरमेश्वरप्रीत्यर्थंविघ्नेशस्य
(15) जन्मदानांषष्ठीदेव्याः जीवंतिकायाः स्कंदस्यधात्रै भगवत्याश्चपूजनमहंकरिष्ये॥ आदौ
आविघ्नतासिध्यर्थगणेशपूजनमहंकरिष्ये॥ अक्षतपुंजेपुगीफलंनिधायभूर्भुवःसुवः
इतिसमस्तव्याहृतिभिः पूजयेत्॥ ततः॥ सूयवसाद्भगवतीहि भूयाअथोवयंभगवंतः भाग
स्याम॥ अद्धितृणमघ्न्येविश्वदानीं पिबशुद्धमुदकमाचरंती॥ हृदयादिषडंगन्या ३
संकृत्वाकलशंसंपूज्यघटंपूजयेत्॥ अपवित्रःपवित्रोवाइतिपूजाद्रव्याणिसं

Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai.

(५५A)

प्रोक्षप अक्षतपुंजेषु पुगीफलानि निधाय देवता आवाहयेत् ॥ विघ्नेशायनमः ॥ विघ्ने
शं आवाहयामि ॥ जन्मदाभ्योनमः ॥ जन्मदाः आवाहयामि ॥ षष्टिदेव्यैनमः ॥ षष्टि
देवीमावाहयामि ॥ जीवंतिकायै ये ॰ जीवंतिकामा ॰ स्कंदायनमः ॥ स्कंदमावाह ॰ श्री
स्त्रिभगवत्यैनमः ॥ भगवतीमावाहयामि ॥ ६ ॥ यथाचारं महीद्योरित्यादि वरुणं आवा
ह्य ॥ स्वयवसाद्भगव ॰ विघ्नेशजन्मदाषष्टीदेवीजीवंतिकास्कंदभगवतीवरुणेभ्योनम
मइतिषोडशोपचारैः पूजयेत् ॥ ततः शांतिपाठः ॥ ततः उत्तरपूजां विधाय ॥ ततः
सर्वविघ्नहरोसित्वमेकदंतगजानन ॥ षष्टीगणैरर्चितः प्रीत्या बालं दीर्घायुषं कुरु ॥ १ ॥
लंबोदरमहाभाग सर्वोपद्रवनाशन ॥ त्वत्प्रसादादविघ्नेन चिरं जीवतु बालकः ॥ २ ॥

ष.पु. इतिविघ्नेशंप्रार्थयेत्॥ वरदाःसायुधायूयंजन्मदाशक्तिविश्रुताः॥ शक्तिभिःसहबालंमेरक्षंताञ्च
२ न्हिजागरे॥१॥ शक्तिस्त्वंसर्वदेवानांलोकानांहितकारिणी॥ मातर्बालमिमंरक्षमहा
षष्टिनमोस्तुते॥२॥ जन्मदानांप्रार्थयेत्॥ गौरीपुत्रायथास्कंदःशिशुत्वेरक्षितःपुरा॥
(15) तथाममाप्ययंबालःषष्टिकेरक्षितांनमः॥१॥ इतिषष्टिदेवीप्रार्थयेत्॥ कार्तिकेयमहा
बाहोगौरीहृदयनंदन॥ कुमारंरक्षभीतिभ्यःपाहिदेवनमोस्तुते॥१॥ इतिस्कंदंप्रा
गा र्थयेत्॥ अस्मिंस्तुसूतिकागारेदेवीभिःपरिवारितो॥ रक्षांकुरुमहाभागसर्वोपद्र
वनाशिनी॥१॥ अयंममकुलोत्पन्नोरक्षार्थंपादयोस्तव॥ नीतोमातर्महाभागे
चिरंजीवतुबालकः॥२॥ रूपंदेहिजयंदेहिभगंभगवतिदेहिमे॥ पुत्रान्देहिधनंदेहि २

Joint project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai.

ष॰ पु॰ सर्वकामांश्चदेहिमे ॥ ३ ॥ शांतिरस्तु शुभंचास्तु प्रणम्य त्वां सुरवायनत्र ॥ यत्तः समा[illegible]पा
३ पंनत्रैवप्रातिगच्छतु ॥ ४ ॥ इतिभगवतीप्रार्थयेत ॥ आवाहित्त देवतानांपिष्टदीपे
निराज्य सदीपान्दधिमाषभक्तबलीन्दत्वाब्राह्मणान्गंधादिनासंपूज्यतांबूल
(16) दक्षिणांदद्यात ॥ इतिषष्टिपूजा ॥ ॥ श्रीरस्तु ॥ शुभंभवतु ॥ श्रीभार्गवप्रसन्न
इदंपुस्तकंवैशंपायनोपाख्य रामचंद्र[illegible]नजपांडुरंगेण लिखितं ॥ ॥

भार्गव
३

(17)

श्रीगणेशायनमः॥ अथपक्षहोमविधिः॥ तत्रमंडनस्मृत्यर्थसारो॥ आमयाव्यार्त्तिमानापद्गतोवाध्वग
तोपिवा॥ राष्ट्रभंगेधनाभावेगुरुगेहेवसन्नपि॥ अन्येष्वेवंप्रकारेषुनिमित्तेष्वागतेषुच॥ समासमग्नि
होत्राणांयथासंभवमाचरेत्॥ निमित्तानामिहैतेषांनिर्दिश्येकंयदुच्यते॥ तत्सर्वेषुनिमित्तेषुजानीया
त्प्रतिपादितं॥ पक्षहोमानशेषान्वाशेषहोमानथापिवेति॥ अग्निहोत्राणामित्यनेनाग्निहोत्रहोमतु
ल्यत्वादौपासनहोमानामपिग्रहणं॥ अथशेषहोमविधिः॥ तृतीयायांचतुर्थ्यांवापंचम्यांवापरत्रच॥
तदादीनांतदंतानांहोमानांशेषसंज्ञिता॥ शेषहोमानांतृतीयायाएवपूर्वावधित्वंनतुद्वितीयाइतिवदंति।
अथप्रयोगः॥ आपन्निमित्तंप्रतिपत्सायंकालमारभ्यचतुर्दशीसायंकालपर्यंतंअमुकसंख्यानूसा
यमौपासनहोमान्स्तंत्रेणव्रीहिभिर्यवैर्वाहोष्यामि॥ इतिसायं॥ आपन्निमित्तंद्वितीयाप्रातःकालमा
रभ्यअमुकपर्वप्रातःकालपर्यंतंअमुकसंख्यान्प्रातरौपासनहोमान्स्तंत्रेणव्रीहिभिर्यवैर्वाहोष्यामि
इतिप्रातः॥ चत्वारिशृंगेत्यादिपूर्वांगंसमिदभ्याधानांतंसकृत्॥ ततःहोमगणनयाहोमद्रव्यंपात्रांतरेगृही
त्वातेनद्रव्येणआहुतिद्वयंजुहुयात्॥ पुनःसमिदभ्याधानादिकर्मश्वरा[illegible]तंसकृत्॥ इतिपक्षहोम
एकैव[illegible]

Joint Project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

(18)

प्रयोगः॥ अथशेषहोमप्रयोगः॥ अमुकतिथिसायंकलमारभ्यच्चतुर्दशीसाय[illegible]र्यंतं अमुकसंख्यान्
शेषान्सायमौपासनहोमांस्तंत्रेणाव्रीहिभिर्होष्यामि॥ इतिसायं॥ अमुकतिथिप्रातःकालमारभ्य
अमुकपर्वप्रातःकालपर्यंतंअमुकसंख्यान्शेषान्प्रातरौपासनहोमांस्तंत्रेणव्रीहिभिर्होष्यामि॥
इतिप्रातः॥ होमेतंत्रंप्राग्वत्॥ होमसंख्ययाद्रव्यग्रहणं॥ इतिविशेषः॥ आपत्तौसत्यांपक्षद्वयेसंत
तंपक्षहोमोभवति॥ तृतीयेपक्षेआपत्तौसत्यामपिनपक्षहोमः॥ किंतुशेषहोमएव॥ तथाचमंडनः॥
तृतीयेनंतरेपक्षेसमासंनसमाचरेत्॥ ॥पक्षहोमेषुकृतेषुसत्स्वाप[illegible]निवृत्तौपुनर्होमः कार्यः॥
[illegible]कृतेषुपक्षहोमेषुआपन्नोद्दिनिवर्त्तते॥ होमंपुनःप्रकुर्याद्वेन्नवासोदोषकृद्भवेत् इति॥ ॥

## मूळ प्रत पाहण्यासाठी संपर्क

---

**इतिहासाचार्य वि.का. राजवाडे संशोधन मंडळ, धुळे**
राजवाडे पथ, गल्ली नं. १, धुळे-४२४००१ (महाराष्ट्र)
**दूरध्वनी क्रमांक** (०२५६२) २३३८४८
**Email ID** : rajwademandaldhule@gmail.com